# श्री एकदंत शरणागति स्तोत्रं (एकदन्तं शरणं व्रजाम:)

## देवर्षय ऊचु:

सदात्मरूपं सकलादिभूतममायिनं सोहम चिन्त्यबोधम् |
अनादिमध्यान्त विहीन मेकं तमेकदन्तं शरणं व्रजाम: || १ ||

अनन्तचिद्रूप मयं गणेश मभेद भेदादि विहीनमाद्यम् |
हृदि प्रकाशस्य धरं स्वधीस्थं तमेकदन्तं शरणं व्रजाम: || २ ||

समाधिसंस्थं हृदि योगिनां यं प्रकाश रूपेण विभातमेतम् |
सदा निरालम्ब समाधिगम्यं तमेकदन्तं शरणं व्रजाम: || ३ ||

स्वबिम्बभावेन विलासयुक्तां प्रत्यक्षमायां विविधस्वरूपाम् |
स्ववीर्यकं तत्र ददाति यो वै तमेकदन्तं शरणं व्रजाम: || ४ ||

त्वदीयवीर्येण समर्थभूत स्वमायया संरचितं च विश्वम् |
तुरीयकं ह्यात्म प्रतीति संज्ञं तमेकदन्तं शरणं व्रजाम: || ५ ||

त्वदीयसत्ताधर मेकदन्तं गुणेश्वरं यं गुणबोधितारम् |
भजन्त मत्यन्तमजं त्रिसंस्थं तमेकदन्तं शरणं व्रजाम: || ६ ||

ततस्त्वया प्रेरितनादकेन सुषुप्तिसंज्ञं रचितं जगद् वै |
समानरूपं ह्युभयत्रसंस्थं तमेकदन्तं शरणं व्रजाम: || ७ ||

तदेव विश्वं कृपया प्रभूतं द्विभावमादौ तमसा विभान्तम् |
अनेकरूपं च तथैकभूतं तमेकदन्तं शरणं व्रजाम: || ८ ||

ततस्त्वया प्रेरितकेन सृष्टं बभूव सूक्ष्मं जगदेकसंस्थम् |
सुसात्त्विकं स्वपन्मनन्तमाद्यं तमेकदन्तं शरणं व्रजाम: || ९ ||

www.viswakalyanam.org





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

तदेव स्वपन् तपसा गणेश सुसिद्धरूपं विविधं बभूव |
सदैकरूपं कृपया च तेऽद्य तमेकदन्तं शरणं व्रजाम: || १० ||

त्वदाज्ञया तेन त्वया हृदिस्थं तथा सुसृष्टं जगदंशरूपम् |
विभिन्न जाग्रन्मय मप्रमेयं तमेकदन्तं शरणं व्रजाम: || ११ ||

तदेव जाग्रद्रजसा विभातं विलोकितं त्वत्कृपया स्मृतेन |
बभूव भिन्न च सदैकरूपं तमेकदन्तं शरणं व्रजाम: || १२ ||

सदेव सृप्रकृतिस्वभावात्तदन्तरे त्वं च विभासि नित्यम् |
धिय: प्रदाता गणनाथ एकस्त मेकदन्तं शरणं व्रजाम: || १३ ||

त्वदाज्ञया भान्ति ग्रहाश्च सर्वे प्रकाशरूपाणि विभान्ति खे वै |
भ्रमन्ति नित्यं स्वविहार कार्यास्त मेकदन्तं शरणं व्रजाम: || १४ ||

त्वदाज्ञया सृष्टिकरो विधाता त्वदाज्ञया पालक एकविष्णु: |
त्वदाज्ञया संहरको हरोऽपि तमेकदन्तं शरणं व्रजाम: || १५ ||

यदाज्ञया भूमिजलेऽत्र संस्थे यदाज्ञयाप: प्रवहन्ति नद्य: |
स्वतीर्थसंस्थ श्च कृत: समुद्रस्त मेकदन्तं शरणं व्रजाम: || १६ ||

यदाज्ञया देवगणा दिविस्था ददन्ति वै कर्मफलानि नित्यम् |
यदाज्ञया शैलगणा: स्थिरा वै तमेकदन्तं शरणं व्रजाम: || १७ ||

यदाज्ञया देवगणा दिविस्था ददन्ति वै कर्मफलानि नित्यम् |
यदाज्ञया शैलगणा: स्थिरा वै तमेकदन्तं शरणं व्रजाम: || १८ ||

यदाज्ञया शेषधराधरो वै यदाज्ञया मोहप्रदश्च काम: |
यदाज्ञया कालधरोर्यमा च तमेकदन्तं शरणं व्रजाम: || १९ ||





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

यदाज्ञया वाति विभाति वायुर्यदाज्ञया गिर्न्जठरादिसंस्थ: |
यदाज्ञयेदं सचराचरं च तमेकदन्तं शरणं व्रजाम: || २० ||

यदन्तरे संस्थित मेकदन्त स्तदाज्ञया सर्वमिदं विभाति |
अनन्तरूपं हृदि बोधकं यस्त मेकदन्तं शरणं व्रजाम: || २१ ||

सुयोगिनो योगबलेन साध्यं प्रकुर्वते क: स्तवनेन स्तौति |
अत: प्रणामेन सुसिद्धिदोस्तु तमेकदन्तं शरणं व्रजाम: || २२ ||

## गृत्समद उवाच

एवं स्तुत्वा गणेशानं देवा: समुनय: प्रभुम् | तृष्णीं भावं प्रपद्यैव ननृतु र्हर्ष संयुता: || २३ ||
स तानुवाच प्रीतात्मा देवर्षीणां स्तवेन वै | एकदन्तो महाभागो देवर्षीन् भक्तवत्सल: || २४ ||

## एकदन्त उवाच

स्तोत्रेणाहं प्रसन्नोऽस्मि सुरा: सर्षिगणा: किल |
वरदोऽहं वृणुत वो दास्यामि मनसीप्सितम् || २५ ||

भवत्कृतं मदीयं यत् स्तोत्रं प्रीतिप्रदं च तत् |
भविष्यति न संदेह: सर्वसिद्धि प्रदायकम् || २६ ||

यं यमिच्छति तं तं वै दास्यामि स्तोत्रपाठत: |
पुत्र पौत्रादिकं सर्व कलत्रं धनधान्यकम् || २७ ||

गजाश्वादिक मत्यन्तं राज्य भोगादिकं ध्रुवम् |
भुक्तिं मुक्तिं च योगं वै लभते शान्ति दायकम् || २८ ||

मारणोच्चाटनादीनि राजबन्धादिकं च यत् |
पठतां श्रृण्वतां नृणां भवेच्च बन्धहीनता || २९ ||

www.viswakalyanam.org





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

एकविंशति वारं यः श्लोकानेवैक विंशतीन् |
पठेच्च हृदि मां स्मृत्वा दिनानि त्वेकविंशतिम् || ३० ||

न तस्य दुर्लभं किञ्चत् त्रिषु लोकेषु वै भवेत् |
असाध्यं साध्येन्मर्त्यः सर्वत्र विजयी भवेत् || ३१ ||

नित्यं यः पठति स्तोत्रं ब्रह्मभूतः स वै नरः |
तस्य दर्शनतः सर्वे देवाः पूता भवन्ति च || ३२ ||

**|| इति श्री एकदंत शरणागति स्तोत्रं सम्पूर्णं ||**

www.viswakalyanam.org





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133